महाभूतविनाशस्तु प्रलये प्रत्युपस्थिते । सर्व्वप्राणभृतां धीरा ! महदुत्पद्यते भयम् । स धीरः सर्व्वलोकेषु न मोहमधिगच्छति । विष्णुरेवादिसर्गेषु स्वयम्भूर्भवति प्रभुः । एवं हि यो वेद गुहाशयं प्रभुं परं पुराणं पुरुषं विश्वरूपम् । हिरण्मयं बुद्धिमतां परां गतिं स बुद्धिमान् बुद्धिमतीत्य तिष्ठति” भा०आश्व०प०अ०४० । स च सर्गः दशविधः प्राकृतः षड्विधः, वैकृतस्त्रिविधः, उभयात्मक एकविधः इति भेदात् तद्विवरणम्” भाग० ३स्क०१०अ० । “विश्वं वै ब्रह्म तन्मात्रं संस्थितं विष्णुमायया । ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्त्तिना १२ । यथेदानीं तथाग्रे च पश्चादप्येतदीदृशम् १३ । सर्गोनवविधस्तस्य प्राकृतोवैकृतश्च यः । कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः १४ । आद्यस्तु महतः सर्गोगुणवैषम्यमात्मनः । द्वितीयस्त्वहमोयत्र द्रव्यज्ञानक्रियोदयः १५ । भूतसर्गस्तृतीयस्तु तन्मात्रोद्रव्यशक्तिमान् । चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः १६ । वैकारिको देवसर्गः पञ्चमोयन्मयं मनः । षष्ठस्तु तमसः सर्गोयस्तु बुद्धिकृतः प्रभोः १७ । षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु रजोभाजो भगवतोलीलेयं हरिमेधसः १८ । सप्तमोमुख्य सर्गस्तु षड्विधस्तस्थुषाञ्च यः । वनस्पत्योषधिलतात्वक् सारावीरुधो द्रुमाः १९ । उत्स्रोतसस्तमःप्राया अन्तःस्पर्शा विशेषिणः २० । तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधोमतः । अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः २१ । गौरजोमहिषः कृष्णः शूकरो गवयोरुरुः । द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम ! । खरोऽश्वोऽश्वतरोगौरः शरभश्चमरी तथा एते चैकशफाः क्षत्तः ! शृणु पञ्चनखान् पशून् २२ । श्वा शृगालोवृकोव्याघ्रोमार्ज्जारः शशशल्लकौ । सिंहः कपिर्गजः कूर्म्मो गोधा च मकरादयः । कङ्कगृध्रवकश्येनभासभल्लकबर्हिणः । हंससारसचक्राह्वकाकोलूकादयः खगाः २३ । अर्व्वाक्स्रोतस्तु नवमः क्षत्तरेकविधोन्नृणाम् । रजोऽधिकाः कर्म्मपरा दुःखे च सुखमानिनः २४ । वैकृतास्त्रयएवैते देवसर्गश्च सत्तम ! । वैकारिकस्तु यः प्रोक्तःकौमारस्तूभयात्मकः २५ । देवसर्गश्चाष्टविधोविबुधाः पितरोऽसुराः । गन्धर्व्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः । भूतप्रेतपिशाचाश्च विद्याध्राः किन्नरादयः । दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः” । “स्वर्यातिरिक्तसृज्याभावं दर्शयन् कालस्य सृष्टिनिमित्ततां दर्शयति विश्वमिति । विष्णुमायया संस्थितं संवृतम् । ब्रह्म तन्मात्रं सत विश्वं ईश्वरेण कर्त्रा कालेन निमित्तेन परिच्छिन्नं पृथक् प्रकाशितम् । अव्यक्ता मूर्त्तिः स्वरूपं यस्येति स्वतोनिर्व्विशेषता दर्शिता १२ । अप्रतिष्ठत्वं दर्शयितुं तत्कार्य्यविश्वप्रवाहस्याप्रतिष्ठामाह यथेदानीमस्ति तथाग्रे पूर्व्वमप्यासीत् । पश्चादपि तथा भविष्यति १३ । एवं सामान्यतः कालं निरूप्य विशेषतो निरूपयिष्यन् तन्निमित्तस्य पूर्व्वसर्गस्य पूर्व्वोक्तानेव भेदान् अनुवदति सर्गइति । यस्तु प्राकृतोवैकृतश्च स तु दशमः तन्निमित्तमेव त्रिविधं प्रलयमाह कालेनैव बलेन नित्यप्रलयः द्रव्येण सङ्कर्षणमुखाग्न्यादिना नैमित्तिकः गुणैः स्वस्वकार्य्यं ग्रसद्भिः प्राकृतिकः १४ । तानेव सर्गान् प्रपञ्चयति । आद्य इत्यादिना यावदध्यायसमाप्ति । महतो लक्षणम् आत्मनोहरेः सकाशात् गुणानां वैषम्यमिति । अहमः अहङ्कारस्य । तस्य लक्षणं यत्रेति । द्रव्यादयो-वक्ष्यमाणास्त्रयः सर्गाः १५ तन्मात्रो भूतसर्गः । ततः-सूक्ष्मसर्ग इत्यर्थः । द्रव्यशक्तिमान् महाभूतोत्पादकः ज्ञानकर्म्मेन्द्रियात्मकश्चतुर्थः १६ । पञ्चमोवैकारिकः । इन्द्रियाधिष्ठातारोदेवाः मनश्च । षष्ठस्त तमसः पञ्चपर्व्वाविद्यायाः । अबुद्धिजीवानामावरणम् विक्षेपश्च तां करोतीत्यबुद्धिकृत् तस्य १७ । मे मत्तः शृणु अनुद्देगेन श्रोतव्यतामाह । यद्विषया मेधा संसारं हरति तस्य हरेर्लीला । यद्वा इयमिति तमआदिसर्गरूपा । रजोभाज इति ब्रह्मरूपस्येत्यर्थः । अस्मिन् पक्षेऽबुद्धिकृत इति प्रथमान्तं अनवधानकृत इत्यर्थः १८ । मुखमिव प्रथमं कृतःमुख्यः सर्गः । तस्थुषां स्थावराणाम् । षड्विधमेवाह । ये पुष्पं विना फलन्ति ते वनस्पतयः । ओषधयः फलपाकान्ताः । लताः आरोहणापेक्षाः । त्वक्सारा वेण्वादयः । लता एव काठिन्येनारोहणानपेक्षा वीरुधः । ये पुष्पैः फलन्ति ते-द्रुमाः १९ । तेषां साधारणलक्षणमाह ऊर्द्ध्वंस्रोत आहारसञ्चारो येषाम् । तमःप्राया अव्यक्तचैतन्याः । अन्तःस्पर्शमेव जानन्ति नान्यत् तदप्यन्तरेव न बहिः । विशेषिणः अव्यवस्थितपरिणामाद्यनेकभेदवन्तः २० । तिर्य्यक्स्रोतसां सर्गमाह तिरश्चामिति । स चाष्टविंशतिभेदः । तिरश्चां लक्षणम् अविदः श्वस्तनादिज्ञानशून्याः । भूरितमसः आहारादिमात्रनिष्ठाः । घ्राणज्ञाः घ्राणेनैवेष्टमर्थं जानन्ति हृदि अवेदिनः दीर्घानुसन्धानशून्याः । तथा च श्रुतिः । “अथेतरेषां पशूनाम् अशनापिपासे एवाभिज्ञानं न विज्ञातं वदन्ति न विज्ञातं पश्यन्ति न विदुः श्वस्तनं न लोकालोकाविति” २१ । अष्टविंशतिभेदानाह